पापस्य, पूर्वाचरिताऽशुभकर्मणः 'विवेग' विवेकं पृथक्भावं पार्थक्यम् 'कंखेज्ज' आकांक्षेत्, तथा 'दुक्खेण' दुःखेन-दुःखयतीति दुःखं परीषहोपसर्गजनिता पीड़ा, तेन 'पुट्ठे' स्पृष्टः-व्याप्तोऽपि सन् 'धुयमाइएज्जा' धुतमाददीत, धुतं-संयमम् मोक्षं वा गृह्णीयात् । 'संगामसीसे' संग्रामो रणः तस्य शिरसि पुरोभागे इव 'परं दमेज्जा' परं शत्रुं दमयेत् । यथा-कश्चिदतुलपराक्रमः सुभटः संग्रामाग्रभागे-स्थितः शत्रुभिर्बाध्यमानोऽपि तेषां बाधां धैर्येण सहन् तान् विनाशयति । एवमेव-दान्तः साधुरपि संयममार्गे स्थितः परिषहादिभिरनवरतं बाध्यमानोऽपि कर्मशत्रुं सहसा विनाशयेत् ॥इति॥२९॥

पुनरप्याह— 'अविहम्ममाणे' इत्यादि ।

मूलम्—अविहम्ममाणे फलगावतट्ठी समागमं कंखति अंतकस्स।
णिधूय कम्मं ण पवंचुवेइ अक्खक्खए वा सगडं॥त्तिबेमि॥३०॥

के लिए ही आहार करें । उसे उतना ही आहार करना चाहिए जिससे शरीर काम देता रहे । वह शरीर की पुष्टि के लिए न खाएँ । तथा पूर्वोपार्जित अशुभ कर्म को पृथक् करने की आकांक्षा करें । जब दुःख अर्थात् परीषह उपसर्गजनित पीड़ा से स्पृष्ट हो तो संयम को अथवा मोक्ष को ग्रहण करे । जैसे अनुपम पराक्रमवान् सुभट संग्राम के अग्र-भाग में स्थित होकर शत्रुओं द्वारा बाधित होकर भी उस बाधा को धैर्य के साथ सहन करता है और शत्रुओं का विनाशकरता है; इसी प्रकार दमनशील साधु संयममार्ग में स्थित होकर परीषहों आदि से पीड़ित होने पर भी कर्म शत्रुओं को विनष्ट करने में पराक्रम करें ।२९।

આહાર લેવો જોઇએ. તેણે એટલો જ આહાર લેવો જોઈએ કે જેથી શરીર કામ દેતું રહે. તેણે શરીરની પુષ્ટિને માટે કે સ્વાદલોલુપતાને કારણે ખાવું જોઈએ નહીં. તેણે પૂર્વોપાર્જિત કર્મોને આત્માથી અલગ કરવાની જ અભિલાષા કરવી જોઇએ. જ્યારે દુઃખ આવી પડે એટલે કે પરીષહ કે ઉપસર્ગ-જનિત પીડા આવી પડે, ત્યારે તેણે સમભાવ પૂર્વક તેને સહન કરીને સંયમના અથવા મોક્ષના માર્ગ પર અવિચલ રહેવું જોઈએ. જેવી રીતે અનુપમ પરાક્રમથી યુક્ત સુભટ, સંગ્રામના અગ્ર ભાગમાં દૃઢતા પૂર્વક ખડો રહીને, શત્રુઓ દ્વારા ગમે તેવી મુશ્કેલીઓ ઊભી કરવામાં આવે તો પણ ધૈર્યથી તેમનો સામનો કરીને, શત્રુઓનો વિનાશ કરે છે, એજ પ્રમાણે દમનશીલ સાધુ પણ સંયમમાર્ગમાં દૃઢ રહીને. પરીષહો આદિ દ્વારા પીડિત થવા છતાં પણ, કર્મશત્રુઓનો વિનાશ કરવામાં જ પ્રયત્નશીલ રહે છે. ।।गाथा २९।।

छाया—अपि हन्यमानः फलकावतष्टः समागमं कांक्षत्यन्तकस्य ।
निर्धूय कर्म न प्रपञ्चमुपैति अक्षक्षय इव शकटमिति ब्रवीमि ॥३०॥

अन्वयार्थः—(अविहम्ममाणे) साधुः अपि हन्यमानः उपसर्गादिभिः पीड्यमानोपि (फलगावतट्ठी) फलकावतष्टः-फलकवत् तनूकृत (अंतकस्स समागमं

और कहते हैं-'अवि हम्ममाणे' इत्यादि ।

शब्दार्थ--'अविहम्ममाणे-अपि हन्यमानः' साधु परीषह एवं उपसर्गों के द्वारा पीडा पाता हुआ भी उसे सहन करे 'फलगावतट्ठी-फलकावतष्टः' जैसे काष्ठ की पटिया दोनों तरफसे छीली जाती हुई रागद्वेष नहीं करती है उसीप्रकार साधु एवं अभ्यन्तर तपसे कष्ट पाता हुआ भी रागद्वेष न करे 'अंतकस्स समागमं कंखति-अन्तकस्य समागमं कांक्षति' मृत्यु के आनेकी प्रतीक्षा करे 'णिधूय कम्मं-कर्म निर्धूय' इस प्रकार से कर्म को दूर करके साधु 'ण पवंचुवेइ-न प्रपञ्चम् उपैति' जन्म, मरण और रोग, शोक आदि को प्राप्त नहीं करता है 'अक्खक्खए वा सगडं-अक्षक्षये शकटमिव' जैसे अक्ष (धुरा) के टूट जाने से गाडी आगे नहीं चलती है 'त्तिबेमि-इति ब्रवीमि' ऐसा मैं कहता हूं ॥३०॥

अन्वयार्थ--उपसर्गों द्वारा पीड़ित होने पर भी साधु काष्ठ के पटिये के जैसे रागद्वेष न करे, किन्तु समभाव से मृत्यु की प्रतीक्षा करे।

સૂત્રકાર સાધુઓને કહે છે-'अवि हम्ममाणे' ઇત્યાદિ-

શબ્દાર્થ—'अवि हम्ममाणे-अपि हन्यमानः' સાધુ પરીષહ અને ઉપસર્ગો દ્વારા પીડા પામીને પણ તેને સહન કરે 'फलगावतट्ठी-फलकावतष्टः' જેમ લાકડાના પાટિયા બન્ને બાજુથી છોલાવા છતાં પણ રાગદ્વેષ કરતા નથી એજ પ્રમાણે બાહ્ય અને આભ્યંતર તપથી કષ્ટ પામીને પણ રાગદ્વેષ ન કરે 'अंतकस्स समागमं कंखति-अंतकस्य समागमं कांक्षति' પરંતુ મોત આવવાની રાહ જુએ 'णिधूय कम्मं-कर्म निर्धूय' આ રીતથી કર્મને દૂર કરીને સાધુ 'ण पवंचुवेइ-न प्रपञ्चम् उपैति' જન્મ, મરણ અને રોગ, શોક, વિગેરને પ્રાપ્ત કરતા નથી 'अक्खक्खए वा सगडं-अक्षक्षये शकटमिव' જેમ અક્ષ કહેતાં ધોંસરાના તૂટિ જવાથી ગાડી આગળ ચાલી શકતી નથી. 'त्तिबेमि-इति ब्रवीमि' એ પ્રમાણે હું કહું છું ॥ ૩૦ ॥

સૂત્રાર્થ—ઉપસર્ગો દ્વારા પીડિત થવાનો પ્રસંગ આવી પડે, તો પણ સાધુએ કાષ્ટના પાટિયાની જેમ રાગદ્વેષ કરવો જોઈએ નહીં, પરન્તુ સમભા-

कंखति) अन्तकस्य मृत्योः समागममागमनं पण्डितमरणं कांक्षति आकाङ्क्षति (णिधूय कम्मं) कर्म निर्धूयापनीय (ण पवंचुवेइ) प्रपञ्चम् संसारम् न उपैति न प्राप्नोति (अक्खक्खए वा सगडं) अक्षक्षये शकटमिव गत्यादिकम् (त्तिबेमि) इति ब्रीमीमि, इति ॥३०॥

टीका—परीषहादिभिः 'हम्मखाणे' हन्यमानः 'अवि' अपि पीडामुपगतो पि सम्यक् तस्य सहनं कुर्यात् । 'फलगावतट्ठी फलकावतष्टः, फलकं काष्ठखण्डः उभाभ्यामपि पार्श्वाभ्यां तष्ठो घर्षितो घर्षणमनुभवन् । अथवा, यथा काष्ठखण्डः शीतातपाभ्यां पराभूयमानोऽपि न वेपते, सुखं दुःखं वा नाऽनुभवति । तथा-साधुरपि बाह्याभ्यन्तरतपोभ्यां निष्टप्तदेहः सन्-अवतिष्ठेत्' एवंभूतः सन् अंतकस्स' अन्तं विनाशं करोतीति, अन्तको मृत्युः तस्य 'समागमं' समागमम् आगमनम् पण्डितमरणरूपं 'कंखति' कांक्षति-अभिलषति । एवम्-'कम्मं अष्टविधं कर्म ज्ञानावरणीयादिकं णिधूय' नितरां निर्धूय विनाश्य 'ण' न 'पवंचुवेइ'

ऐसा करने वाला साधु भवभ्रमण को प्राप्त नहीं होता जैसे धूरा टूटजाने पर गाड़ी आदि आगे नहीं चलती । ऐसा मैं कहता हूँ ॥३०॥

टीकार्थ--साधु यदि परीषह से पीड़ित हो तो उसे सम्यक् प्रकार से सहन करें । जैसे काठ का पटिया दोनों ओर से छीला जाने पर भी या काष्ठ का खण्ड सर्दी गर्मी से पराभूत होकर भी कम्पित नहीं होता या रागद्वेष के वशीभूत नहीं होता, उसी प्रकार उपसर्ग आदि से पीड़ित होता हुआ भी साधु राग द्वेष से रहित होकर मृत्यु की प्रतीक्षा करता है अर्थात् समाधि मरण की अभिलाषा करें । ऐसा करके वह

વધી મૃત્યુને ભેટવા તૈયાર રહેવું જોઈએ. જેમ ધૂરા તૂટી જાય ત્યારે ગાડી આગળ વધી શકતી નથી, એજ પ્રમાણે કર્મોનો સદન્તર ક્ષય થઈ જવાથી ભવભ્રમણ પણ ચાલૂ રહી શકતું નથી, એવુ તીર્થંકરે કહ્યુ કથન છે. હું તે કથનનું જ અનુકથન કરી રહ્યો છું. ॥૩૦॥

ટીકાર્થ—ગમે તેવાં ઉગ્રપરીષહોને પણ સાધુએ સમભાવપૂર્વક સહન કરવા જોઇએ. જેમ લાકડાના પાટિયાને બન્ને તરફથી છોલવામાં આવે, અથવા તેને ગમે તેવી ઠંડી ગરમી સહન કરવી પડે, તો પણ તેનો લાકડાના પાટિયા પર કોઈ પ્રભાવ પડતો નથી, એજ પ્રમાણે ઉપસર્ગ આદિ દ્વારા ગમે તેવી પીડા સહન કરવાનો પ્રસંગ આવે, તો પણ સાધુ રાગદ્વેષથી રહિત થઈને, મૃત્યુની પ્રતીક્ષા કરે છે, એટલે કે સમાધિ મરણની અભિલાષા કરે છે. એવું કરવાથી તે જ્ઞાનાવરણીય આદિ આઠે પ્રકારનાં

प्रपञ्चं समुपैति, प्रपञ्चं जरामरणादि प्रपञ्च्यते विस्तार्यते यस्मिन् स प्रपञ्चः संसारस्तं न प्राप्नोति। 'अक्खक्खए' अक्षक्षये-अक्षस्य क्षये विनाशे सति 'सगडं' शकटम् इव। यथा शकटम्-अक्षस्य रथचक्रयोजकाऽयोदण्डस्य विनाशे सति तन्न गच्छति। तथा-साधुरपि संसारमुपगच्छतीति। एवं तीर्थंकरोदितं तुभ्यमहं कथयामि, इति सुधर्मस्वामी-स्वशिष्येभ्यः कथयति ।२०॥

इति श्री-विश्वविख्यातजगद्वल्लभादिपदभूषितबालब्रह्मचारि-'जैनाचार्य' पूज्यश्री-घासीलालव्रतिविरचितायां श्री सूत्रकृताङ्गसूत्रस्य "समयार्थबोधिन्याख्यायां" व्याख्यायां कुशीलपरिभाषाख्यं सप्तममध्ययनं समाप्तम् ॥७-१॥

ज्ञानावरणीय आदि आठ कर्मों को विनष्ट करके जरा जन्म मरण के प्रपंच से मुक्त होता हैं। जैसे गाडी धुरा के टट जाने पर आगे नहीं जाती, उसी प्रकार साधु भी कर्मों का क्षय हो जाने से संसार को प्राप्त नहीं होता अर्थात् भवभ्रमण आगे नहीं करता। तीर्थंकरोक्त ही मैं तुम्हें कहता हू, ऐसा सुधर्मा स्वामी अपने शिष्यो से कहते हैं ॥२०॥

जैनाचार्य जैनधर्मदिवाकर पूज्यश्री घासीलालजी महाराजकृत 'सूत्रकृताङ्गसूत्र' की समयार्थबोधिनी व्याख्या के कुशील-परिभाषा नामका सातवां अध्ययन समाप्त ॥७-१॥

કર્મોનો ક્ષય કરીને જન્મ જરા અને મરણના દુઃખમાથી મુકત થઈ જાય છે. જેમ ધૂરા તૂટી જાય તો ગાડી આગળ ચાલી શકતી નથી, એજ પ્રમાણે કર્મોનો ક્ષય થઈ જવાને કારણે તે સાધુને પણ ભવભ્રમણ ચાલૂ રહેતું નથી.

'તીર્થંકરોએ આ પ્રમાણે જે ઉપદેશ આપ્યો છે, તેનું જ હું આપની સમક્ષ અનુકથન કરી રહ્યો છુ' એવું સુધર્મા સ્વામી પોતાના શિષ્યોને કહે છે. ॥ગાથા ૩૦॥

જૈનાચાર્ય જૈનધર્મદિવાકર પૂજ્યશ્રી ઘાસીલાલજી મહારાજ કૃત 'સૂત્રકૃતાંગસૂત્ર'ની સમયાર્થબોધિની વ્યાખ્યાના કુશીલ પરિભાષા નામનું ॥ સાતમું અધ્યયન સમાપ્ત ॥૭-૧॥

॥ अथाऽष्टमं वीर्याध्ययनं प्रारभ्यते ॥

गतं सप्तममध्ययनम्, अतः परमष्टममारभ्यते । अस्य चायमभिसम्बन्धः, इह प्रक्रान्ताऽध्ययने कुशीलास्तद्विरोधिनः सुशीलाश्च व्याख्याताः । एतयोः सुशीलकुशीलयोः सुशीलत्वं कुशीलत्वं च संयमवीर्यान्तरायाणामुदयात्तत्क्षयोपशमाच्च भवतीत्यतो वीर्यप्रतिपादनायाऽष्टमाध्ययनं प्रारभ्यते । अनेन सम्बन्धेनाऽऽयातस्याऽष्टमाऽध्ययनस्याऽऽदिमा गाथा–'दुहा वेयं' इत्यादि ।

मूलम्–दुहा वेयं सुयक्खायं वीरियं ति पवुच्चई ।
किंनु वीरस्स वीरत्तं कहं चेयं पवुच्चई ॥१॥

छाया—द्विधा वेदं स्वाख्यातं वीर्यमिति प्रोच्यते ।
किं नु वीरस्य वीरत्वं कथं चेदं हि प्रोच्यते ॥१॥

आठवें अध्ययन का प्रारंभ–

सातवाँ अध्ययन समाप्त हुआ। अब आठवाँ प्रारंभ किया जाता है। इसका सम्बन्ध इस प्रकार है–सातवें अध्ययन में कुशील और सुशील साधु की व्याख्या की गई है। सुशील की सुशीलता और कुशील की कुशीलता संयम वीर्यान्तराय कर्म के क्षयोपशम तथा उदय से होती है। अतः वीर्य का प्रतिपादन करने के लिए अष्टम अध्ययन का आरंभ किया जाता है। इस सम्बन्ध से प्राप्त अष्टम अध्ययन का यह आद्य सूत्र है–'दुहावेयं' इत्यादि ।

शब्दार्थ–'वेयं वीरियंति पवुच्चइ–वेदं वीर्यमिति प्रोच्यते' वे आगे स्पष्टरूप से वीर्य को कहाजायगा 'दुहा सुयक्खायं–द्विधा स्वा-

---

આઠમા અધ્યયનનો પ્રારંભ

સાતમું અધ્યયન સમાપ્ત થયું. હવે આઠમા અધ્યયનનો પ્રારંભ કરવામાં આવે છે. આ અધ્યયનનો સંબંધ આ પ્રમાણે છે.—સાતમા અધ્યયનમાં કુશીલ અને સુશીલ સ્વભાવવાળા સાધુનું કથન કરવામાં આવેલ છે. સુશીલનું સુશીલ પણ અને કુશીલનું કુશીલ પણું સંયમના વીર્યાન્તરાયકર્મના ક્ષયોપશમ તથા તેના ઉદયથી થાય છે તેથી વીર્યનું પ્રતિપાદન કરવા માટે આ આઠમા અધ્યયનનો પ્રારંભ કરવામાં આવે છે–આ સંબંધથી આવેલ આઠમા અધ્યયનનું પહેલું સૂત્ર 'दुहावेय' ઈત્યાદિ છે.

શબ્દાર્થ—'वेयं वीरियत्ति पवुच्चइ–वेदं वीर्यमिति प्रोच्यते' હવે પછી સ્પષ્ટરૂપથી વીર્યનું કથનકરવામાં આવશે. 'दुहा सुयक्खायं–द्विधा स्वाख्यातम्'

अन्वयार्थः--'वेयं वीरियं ति पवुच्चई' वा इदं वीर्यमिति प्रोच्यते तत् 'दुहा सुयक्खायं' द्विधा-द्विप्रकारेण स्वाख्यातं-सम्यग्रूपेण कथितम् (वीरस्स-वीरत्तं किं नु) वीरस्य-सुभटस्य वीरत्वम् (किं नु) किं नु-कथं भवति, अथवा-(कहं चेयं पवुच्चई) कथम्-केन प्रकारेण तत्-वीरत्वमुच्यते-कथ्यते इति ॥१॥

टीका--'वेयं' वा इदम् 'वीरियं ति' वीर्यमिति 'दुहा' द्विधा-द्विप्रकारेण 'सुयक्खायं' स्वाख्यातं-सुकथितम्। वेयमित्यत्र वा शब्दो-वाक्यालङ्कारे भवति, 'इदं शब्दस्य प्रत्यक्षविषये शक्ति.' इदमस्तु सन्निकृष्टे तदिति परोक्षे विजानीयादिति नियमात्। तथा च इदं बुद्ध्या सन्निकृष्टं प्रत्यक्षप्रायम्, वीर्यम्, द्विधा-द्विप्रकारकं प्रकारद्वयेन विभिन्नं भेदद्वयभिन्नं, भेदद्वयविशिष्टं

ख्यातम्' इसे तीर्थंकरोंने दो प्रकारका कहा है 'वीरस्स वीरत्तं किं नु-वीरस्य वीरत्वम् किं नु' वीर पुरुषकी वीरता क्या है? 'कहं चेयं पवुच्चइ-कथं चेदं प्रोच्यते' किस कारण से वह वीर ऐसा कहा जाता है?।१।

अन्वयार्थ—जो वीर्य कहा जाता है, वह दो प्रकार का कहा है। वीर का वीरत्व क्या है? वह किस प्रकार से वीर कहा जाता है?॥१॥

टीकार्थ--वीर्य दो प्रकार का कहा गया है। 'वेयं' यहां 'वा' शब्द वाक्य के अलंकार अर्थ में है। 'इदम्' शब्द की शक्ति प्रत्यक्ष विषय में है, क्यों कि ऐसा नियम है कि-'इदम्' शब्द समीप अर्थ में और 'तत्' शब्द परोक्ष अर्थ में प्रयुक्त होता है। अतः 'इदम्' का अर्थ है-बुद्धि से समीप-प्रत्यक्ष जैसा।

આને તીર્થંકરોએ બે પ્રકારનુ કહેલ છે 'वीरस्स वीरत्तं किं नु-वीरस्य वीरत्वम् किं नु' વીરપુરૂષની વીરતા એ શું છે! 'कहं चेयं पवुच्चइ-कथं चेदं प्रोच्यते' કયા કારણથી તેઓ વીર એ પ્રમાણે કહેવાય છે?॥૧॥

અન્વયાર્થ—જેને વીર્ય કહેવામાં આવે છે. એવું તે વીર્ય બે પ્રકારનું કહેવાય છે. વીરનું વીરપણુ શું છે? તે કયા પ્રકારથી વીર એ પ્રમાણે કહેવાય છે? ॥ ૧ ॥

ટીકાર્થ—વીર્ય બે પ્રકારનુ કહેવામાં આવે છે. 'वेय' અહિયાં 'वा' શબ્દ વાકયના અલંકાર અર્થમાં આવેલ છે. ઇદમ્ શબ્દનો પ્રયોગ પ્રત્યક્ષ વિષમાં થાય છે. કેમકે એવો નિયમ છે કે-'इदम्!' શબ્દનો સમીપ-નજીક વાચક અર્થમાં અને 'तत्! શબ્દનો પરોક્ષ અર્થમાં પ્રયોગ થાય છે. જેથી અહિયાં 'इदम्' એ શબ્દનો અર્થ-બુદ્ધિની સમીપ અર્થાત્ પ્રત્યક્ષ જેવો છે,

वीर्यम्। 'पवुच्चई' प्रोच्यते-कथ्यते तीर्थंकरादिभिः, 'सुयक्खायं' स्वाख्यातम्-सुष्ठु आख्यातं कथितमित्यर्थः, विशेषेण ईरयति प्रेरयति निष्कासयति अहितं येन तद्वीर्यमिति कथ्यते, जीवस्य शक्तिविशेषः 'वीरस्स' वीरस्य सुभटस्य 'किं नु' किं शब्दः जिज्ञासार्थः, नु शब्दो वितर्कवाची। 'वीरत्तं' वीरत्वं किम्, केन प्रकारेणाऽसौ सुभटो वीर इति कथ्यते। 'कहं' कथम्-केन प्रकारेण 'चेयं' च इदं वीरत्वम् 'पवुच्चइ' प्रोच्यते, यदिदं वीर्यं द्विधाविभक्तमिति तत् किं केन वा कारणेन भवति, किं वा तस्य स्वरूपमिति। तीर्थंकरगणधराभ्यां वीर्यस्य द्वौ भेदौ कथ्येते, तत्र जिज्ञास्यते-वीराणां केयं वीरता, कथं वा स वीर इत्याख्यायते इति भावः ॥१॥

यह वीर्य दो प्रकार का तीर्थंकरो आदि ने कहा है। वीर्य जीव की एक विशिष्ट शक्ति है। जो विशेष रूप से प्रेरणा करता है-अहित को हटाता है, वह वीर्य कहलाता है।

'नु' शब्द जिज्ञासा के अर्थ में है, वितर्क का वाचक है। अर्थात् यहां यह प्रश्न उपस्थित होता है कि वीर पुरुष की वीरता क्या है? किस प्रकार से वह सुभट वीर कहा जाता है? दो प्रकार का जो वीर्य कहा गया है वह क्या है और किस कारण से होता है? उसका स्वरूप क्या है?

आशय यह है-तीर्थंकर और गणधर वीर्य के दो भेद कहते हैं। यहाँ यह जिज्ञासा होती है कि वीरों की वीरता क्या है? किस कारण से वीर पुरुष वीर कहलाता है? ॥१॥

આ વીર્ય તીર્થંકર વિગેરે એ બે પ્રકારનું કહેલ છે. વીર્ય જીવની એક વિશેષ પ્રકારની શક્તિ છે. જે વિશેષ રૂપે પ્રેરણા કરે છે-અર્થાત્ અહિતને હટાવે છે. બે વિર્ય કહેવાય છે.

'નુ' શબ્દ જીજ્ઞાસાના અર્થમાં છે. અને વિતર્કનો વાચક છે, અર્થાત્ અહિયાં એવો પ્રશ્ન ઉપસ્થિત થાય છે કે-વીરપુરૂષનું વીરપણું શું છે? અર્થાત્ કઇ રીતે તે સુભટ અર્થાત્ વીર કહેવાય છે? વીર્ય કે જે બે પ્રકારનું કહેલ છે, તે શું છે? અને કયા કારણથી બે પ્રકારનું થાય છે? તેનું સ્વરૂપ કેવું છે?

કહેવાનો હેતુ એ છે કે તીર્થંકર અને ગણધરો વીર્યના બે ભેદો કહે છે, અહિયાં એવી જીજ્ઞાસા થાય છે વીરોનું વીરપણું એ શું છે? કયા કારણથી વીર પુરૂષ 'વીર' એ પ્રમાણે કહેવાય છે? ॥૧॥

भेदप्रदर्शनपूर्वकमेव वीर्यस्वरूपमाह-'कम्म मेगे पवेदंति' इत्यादि ।

मूलम्-कम्म मेगे पवेदंति अकम्मं वावि सुव्वया ।
एएहिं दोहिं ठाणेहिं जेहिं दीसंति मच्चिया॥२॥

छाया—कर्मैके प्रवेदयन्त्यकर्म वापि सुव्रताः ।
आभ्यां द्वाभ्यां स्थानाभ्यां याभ्यां दृश्यन्ते मर्त्याः ॥२॥

अन्वयार्थः—(एगे कम्मं पवेदंति) एके केचन कर्मैव वीर्यं प्रवेदयन्ति कथयन्ति (सुव्वया अकम्मं वा वि) हे सुव्रताः । केचन अकर्म एव वीर्यं कथयन्ति (मच्चिया) मर्त्याः (एएहिं) आभ्याम् (दोहिं ठाणेहिं) द्वाभ्यां स्थानाभ्याम् (दीसंति) दृश्यन्ते इति ॥२॥

अब भेद निरूपण करते हुए वीर्य का स्वरूप कहते हैं- 'कम्म मेगे पवेदंति' इत्यादि ।

शब्दार्थ—'एगे कम्मं पवेदंति-एके कर्म प्रवेदयन्ति' कोई कर्म को वीर्य ऐसा कहते हैं 'सुव्वया अकम्मं वावि-सुव्रताः अकर्म वापि' और हे सुव्रतो! कोई अकर्म को वीर्य कहते हैं 'मच्चिया-मर्त्याः' मर्त्य लोक के प्राणी 'एएहिं-अभ्यां' इन्हीं दोहिं ठाणेहिं-द्वाभ्यां स्थानाभ्याम्' दो स्थानों से 'दीसंति-दृश्यन्ते' देखे जाते हैं ॥२॥

अन्वयार्थ—हे सुव्रतों ! (अच्छे व्रतवाले भव्यो !) कोई कर्म को ही वीर्य कहते हैं, कोई अकर्म को वीर्य कहते हैं। इन्ही दो भेदों में मनुष्य देखे जाते हैं ॥२॥

હવે ભેદોનું નિરૂપણ કરતાં વીર્યનુ સ્વરૂપ કહે છે. 'कम्ममेगे पवेदंति' ઈત્યાદિ

શબ્દાર્થ—'एगे कम्मं पवेदंति-एके कर्म प्रवेदयन्ति' કોઈ કર્મ ને વીર્ય એ પ્રમાણે કહે છે 'सुव्वया अकम्मं वावि-सुव्रताः अकर्म वापि' અને હે સારા વ્રતવાળા 'મુનિયો!' કોઈ અકર્મને વીર્ય એ પ્રમાણે કહે છે. 'मच्चिया-मर्त्याः' મૃત્યુલોકના પ્રાણી 'एएहिं-आभ्यां' આ 'दोहिं ठाणेहिं-द्वाभ्याम् स्थानाभ्यम्' બે સ્થાનોથી 'दीसंति-दृश्यन्ते' દેખાય છે. ॥२॥

અન્વયાર્થ—હે સુવ્રતો (સારાવ્રત વાળા ભવ્યો) કોઈ કર્મને જ વીર્ય કહે છે, કોઇ અકર્મને વીર્ય કહે છે ? એ બે ભેદોવાળા મનુષ્યો જોવામાં આવે છે ॥२॥

टीका—'एगे' एके विद्वांसः 'कम्मं' कर्मैव वीर्यमिति 'पवेदंति' प्रवेदयन्ति-कथयन्ति, क्रियते-स्वप्रयत्नेन निष्पाद्यते इति कर्म, क्रियाया अनुष्ठानम्, तदेव कर्म वीर्यमिति प्रतिपादयन्ति। अथवा-अनुष्ठाने प्रवर्त्तकं तज्जनकम्, अष्टप्रकारमेव वीर्यमिति प्रतिपादयन्ति। तथाहि-औदयिकभावनिष्पन्नं कर्मेत्युपदिश्यते। औदयिकोऽपि भावः कर्मोदयनिष्पन्न एव। 'सुव्वया' सुव्रताः वा शब्दः स्वार्थे। 'अकम्मं' अकर्म अपि वीर्यमिति कथयन्ति, न विद्यते कर्म तद् अकर्म, वीर्यान्तरायक्षयजनितं जीवस्य स्वाभाविकं वीर्यम्। अपि शब्देन चारित्रमोहनीयोपक्रमक्षयोपशमजनितं च वीर्यम्, एवंभूत पण्डितवीर्यमितिभावः। 'एएहिं' एताभ्याम् 'दोहिं' द्वाभ्याम् 'ठाणेहिं' स्थानाभ्याम्, सकर्मकाऽकर्मकापादितबालपण्डितवीर्याभ्यां व्यवस्थितं वीर्यमित्यभिधीयते। जेहिं' याभ्यां स्थानाभ्यां ययो वा स्थानयोः 'मिच्चिया' मर्त्याः-मरणधर्माणो मनुष्याः

टीकार्थ—कोई विद्वान् कर्म को ही वीर्य कहते हैं। उनका कथन है कि अपने प्रयत्न से जो निष्पादित किया जाता है, वह कर्म है। वही कर्म वीर्य कहलाता है। अथवा अनुष्ठान में प्रवृत्ति कराने वाला वीर्य आठ प्रकार का है। औदयिकभाव से निष्पन्न कर्म है और औदयिक भाव भी कर्मोदय से उत्पन्न होता है।

कोई सुव्रत कर्मरहित को भी वीर्य कहते हैं। वीर्यान्तराय कर्म के क्षय से उत्पन्न होने वाला जीव को स्वाभाविक वीर्य है। 'अपि' शब्द से चारित्रमोहनीय के क्षयोपशम से उत्पन्न वीर्य भी ग्रहण कर लेना चाहिए। वीर्य के यही दो भेद हैं। इनमें से कर्म वीर्य बालवीर्य कहलाता है और अकर्मवीर्य पण्डितवीर्य भी कहा जाता है। इन्हीं दो

ટીકાર્થ—કોઈ વિદ્વાન્ કર્મને જ 'વીર્ય' કહે છે, તેઓનું કથન એવું છે કે—પોતાના પ્રયત્નથી જ સંપાદિત કરવામાં આવે છે, તેને કર્મ કહેવાય છે. અને એ કર્મ જ 'વીર્ય' કહેવાય છે અથવા અનુષ્ઠનમાં પ્રવૃત્તિ કરાવનાર વીર્ય આઠ પ્રકારનું કહેલ છે ઔદયિક ભાવથી યુક્ત કર્મ છે. અને ઔદયિક ભાવ કર્મના ઉદયથી ઉત્પન્ન થાય છે.

કોઈ સુવ્રત કર્મથી રહિતને પણ 'વીર્ય' કહે છે. વીર્યાન્તરાય કર્મનો ક્ષય થવાથી ઉત્પન્ન થવાવાળા જીવને સ્વાભાવિક વીર્ય હોય છે. અહિયાં 'અપિ' શબ્દથી ચારિત્ર મોહનીયના ક્ષયોપશમથી ઉત્પન્ન થયેલ વીર્ય પણ ગ્રહણ કરવામાં આવેલ છે. આ બે ભેદો જ 'વીર્ય'ના છે. આમાંથી 'કર્મ વીર્ય' એ બાલવીર્ય કહેવાય છે, અને 'અકર્મવીર્ય' એ પંડિતવીર્ય કહેવાય છે. આ બે ભેદો વાળા મનુષ્યો જોવામાં આવે છે જે પ્રમાણે અનેક પ્રકા-

'दीसंति' दृश्यन्तेऽपदिश्यन्ते वा। तथा हि-अनेकप्रकारककर्मसु प्रयत्नं कुर्वाण मुत्साहबलादिसम्पन्नं मर्त्यं दृष्ट्वा वीर्यवानयमित्येव मपदिश्यते। तथा-आवरण कर्मणां क्षयादनन्तबलसम्पन्नोऽयमित्यपदिश्यते, दृश्यते च इति।

शिष्यप्रश्नानन्तरं श्री सुधर्मस्वामी जम्बूस्वामिप्रभृतिशिष्यवर्गमुद्दिश्य कथयति-हे सुव्रताः! केचन विद्वांसः कर्मैव वीर्यमिति कथयन्ति, केचनाऽकर्मैव वीर्यमिति प्रतिपादयन्ति। अनेन प्रकारेण वीर्यं द्विधा विभज्यते, आभ्यामेव भेदाभ्यां सर्वे मर्त्याः परिदृश्यन्ते इति ॥२॥

इह बालवीर्यं कारणे कार्योपचाराद् कर्मैव वीर्यत्वेन प्रतिपादितम्। इदानीं कारणे कार्योपचारादेव प्रमादं धर्मत्वेनाऽपदिशन्नाह-सूत्रकारः-'पमायं कम्ममाहंसु' इत्यादि।

मूलम्-पमायं कम्मं माहंसु अप्पमायं तहाऽवरं।
तब्भावादेसओ वावि बालं पंडियमेव वा ॥३॥

छाया—प्रमादं कर्म आहुरप्रमादं तथाऽपरम्।
तद्भावादेशतो वापि बालं पण्डितमेव वा ॥३॥

भेदों से या भेदों में मनुष्य दिखाई देते हैं। जैसे अनेक प्रकार के कृत्यों में प्रयत्न करने वाले बल आदि से सम्पन्न पुरुष को देखकर 'यह वीर्यवान् है' ऐसा कहा जाता है और कर्मों का क्षय होने से 'यह अनन्त बल से सम्पन्न है' ऐसा कहा जाता है।

शिष्य के प्रश्न के अनन्तर श्रीसुधर्मा स्वामी, जम्बू स्वामी आदि शिष्यवर्ग को लक्ष्य करके कहते हैं-हे सुव्रतो! कोई-कोई कर्म को ही वीर्य कहते हैं और कोई अकर्म को ही वीर्य कहते हैं। इस प्रकार वीर्य के दो भेद हो जाते हैं। इन्हीं दो भेदों में सभी मनुष्यों का समावेश हो जाता है ॥२॥

રના કૃત્યોમાં પ્રયત્ન કરવ વાળા બળ વગેરેથી યુક્ત પુરૂષને જોઈને 'આ વીર્ય વાળો છે' એ પ્રમાણે કહેવામાં આવે છે. અને કર્મોનો ક્ષય થવાથી 'આ અનંત બળ વાળો છે.' એ પ્રમાણે કહેવામાં આવે છે.

શિષ્યે પ્રશ્ન કર્યા પછી સુધર્મા સ્વામી, જંબૂ સ્વામી વિગેરે શિષ્ય વર્ગને ઉદ્દેશીને કહે છે કે-હે સુવ્રતો! કોઈ કોઈ કર્મને જ વીર્ય કહે છે. આ રીતે વીર્યના બે ભેદો થઈ જાય છે. આ બે ભેદોમાં જ સઘળાં મનુષ્યોનો સમાવેશ થઇ જાય છે. ॥૨॥

अन्वयार्थः—'पमायं कम्म माहंसु' प्रमादं-मद्यविषयकषायादिकं कर्म आहुः -कथयन्ति तीर्थकरादयः 'तहा अप्पमायं अवरं' तथा-अप्रमादम् अपरम् अकर्म आहुः 'तब्भावादेसओ वा वि' तद्भावादेशतः तयोः-बालवीर्यपण्डितवीर्ययोः सत्वादेव 'बालं पंडियमेव वा' बालवीर्यं पण्डितवीर्यं वा भवतीति ॥३॥

टीका—'पमायं' प्रमादम्-प्रकर्षेण माद्यन्ति शुभानुष्ठानरहिता भवन्ति जीवा येन स प्रमादो मद्यादिः। उक्तञ्च—

कारण में कार्य का उपचार करके कर्म को ही बल-वीर्य कहा गया है, अब प्रमाद को ही 'कर्म' कहते हैं। यहां भी कारण में कार्य का उपचार से प्रमाद को कर्मत्वसे समझना चाहिए। सूत्रकार यही कहते हैं-'पमायं कम्ममाहंसु' इत्यादि।

शब्दार्थ—'पमायं कम्ममाहंसु-प्रमादं कर्म आहुः' तीर्थंकरोंने प्रमादको कर्म कहा है 'तहा अप्पमायं अवरं-तथा अप्रमादम् अपरम्' तथा अप्रमाद को अकर्मकहा है 'तब्भावादेसओ वावि-तद्भावादेशतो-ऽपि' इन दोनों की सत्ता से ही 'बालं पंडियमेव वा-बालं पण्डित-मेववा' बालवीर्य तथा पण्डितवीर्य होता है ॥३॥

अन्वयार्थ—तीर्थंकर आदि महापुरुष मद्य आदि प्रमाद को कर्म कहते हैं तथा अप्रमाद को अकर्म कहते हैं। प्रमाद के सद्भाव से बालवीर्य और अप्रमाद के होने से पण्डितवीर्य कहा जाता है ॥३॥

કારણમાં કાર્યનો ઉપચાર કરીને કર્મને જ બાલવીર્ય કહેવામાં આવેલ છે, હવે પ્રમાદને જ 'કર્મ' કહે છે.! આમાં પણ કારણમાં કાર્યનો ઉપચાર થવાથી પ્રમાદને કર્મપણાથી સમજવો જોઇએ સૂત્રકાર એજ કહે છે કે—
'पमायं कम्म माहंसु' ઇત્યાદિ

શબ્દાર્થ—'पमायं कम्म माहंसु-प्रमादं कर्म आहुः' તીર્થંકરોએ પ્રમાદને-કર્મ કહેલ છે. 'तहा अप्पमायं अपरं-तथा अप्रमादम् अपरम्' તથા અપ્રમાદને અકર્મ કહ્યું છે. 'तब्भावादेसओ वावि-तद्भवादेशतो वापि' આ બન્નેની સત્તાથી જ 'बालं पंडियमेव वा-बालं पंडितमेव वा' બાલવીર્ય તથા પંડિતવીર્ય થાય છે. ॥૩॥

અન્વયાર્થ—તીર્થંકર વિગેરે મહાપુરૂષો મદ્ય વગેરે પ્રમાદને કર્મ કહે છે. તથા અપ્રમાદને અકર્મ કહે છે. પ્રમાદના સદ્ભાવથી બાલવીર્ય અને અપ્રમાદથી પંડિતવીર્ય કહેવામાં આવે છે. ॥૩॥

'मज्जं विसयकसाया णिद्दा विगहा य पंचमी भणिया।
एस पमाय पवाओ णिद्दिट्ठो वीयरागेहिं ॥१॥

छाया—मद्यं विषयकषायौ निद्राविग्रहश्च पञ्चमी भणिता।
एते प्रमादाः प्रवादो निर्दिष्टो वीतरागैः ॥१॥ इति।

एतादृशं प्रमादं मद्यादिकं कर्मोपादानभूतम्। 'कम्मं' कर्म-आहुः-कथयन्ति तीर्थंकरादयः, 'तहा' तथा 'अप्पमायं' अप्रमादम् 'अवरं' अपरम् अकर्म आहुः-कथयन्ति ते एवाऽऽचार्याः।

अयं भावः—प्रमादवतो जीवस्य कर्मबन्धनं भवति। कर्मसहितस्य यत् क्रियाऽनुष्ठानं तद्बालवीर्यं भवति। तथा-प्रमादरहितस्य जीवस्य कर्माऽभावो भवति। कर्माऽभावसहितस्य यत् कर्माऽनुष्ठानं तत् पण्डितवीर्यं भवति। एतदेव

टीकार्थ--जिसकी सत्ता के कारण जीव शुभ अनुष्ठान से रहित होते हैं, वह मद्य आदि प्रमाद कहलाता है। कहा भी है-'मज्जं विसय कसाया' इत्यादि।

'मद्य, विषय, कषाय, निद्रा और पांचवीं विकथा, यह पाँच प्रकार के प्रमाद वीतराग देवों ने कहे हैं।' ॥१॥

यह मद्य आदि प्रमाद कर्मों के जनक हैं। इसी कारण तीर्थंकर आदि इन्हें कर्म कहते हैं और प्रमादपरित्याग को अकर्म कहते हैं।

आशय यह है कि-प्रमादवान् जीव को कर्मबन्धन होता है और कर्मयुक्त जीव का जो क्रियाव्यापार है, वह बालवीर्य है। जो जीव प्रमाद से रहित है, उसको कर्मों का अभाव हो जाता है और कर्माभाव वाले जीव का अनुष्ठान पंडितवीर्य कहा जाता है। आशय यह

ટીકાર્થ—જેની સત્તાથી જીવ શુભ અનુષ્ઠાનથી રહિત થાય છે, તે મદ્ય વિગેરે પ્રમાદ કહેવાય છે. કહ્યું પણ છે કે-'मज्जं विसयकसाया' ઇત્યાદિ મદ્ય, વિષય, કષાય, નિદ્રા, અને પાંચમી વિકથા આ પાંચ પ્રકારના પ્રમાદ વીતરાગ દેવોએ કહેલ છે. આ મદ્ય વિગેરે પ્રમાદ કર્મોના જનક-ઉત્પન્ન કરવાવાળા છે. તેજ કારણથી તિર્થંકરો વિગેરે તેને કર્મ એ પ્રમાણે કહે છે. અને પ્રમાદના પરિત્યાગને અકર્મ કહે છે.

કહેવાનો હેતુ એ છે કે-પ્રમાદવાળા જીવને કર્મનું બંધન થાય છે. અને કર્મવાળા જીવનો જે ક્રિયારૂપ વ્યાપાર છે, તે બાલવીર્ય કહેવાય છે. જે જીવ પ્રમાદથી રહિત હોય છે, તેને કર્મોનો અભાવ થઈ જાય છે. અને કર્મના અભાવવાળા જીવના અનુષ્ઠાનને પંડિતવીર્ય કહેવાય છે. અર્થાત્ પ્રમત્ત

-बालवीर्यं पण्डितवीर्यं चेति। प्रमादवतः सकर्मणो वीर्यं बालवीर्यं प्रमादरहितस्य कर्माऽभाववतो वीर्यं पण्डितवीर्यमिति विवेकः। 'दव्भावादेसओ वावि' तद्भावादेशतो वापि, तयो बालवीर्यपण्डितवीर्ययोः भावः-सत्ता तद्भावस्तेन तद्भावेन बालः पण्डित इति व्यवहारो भवति' बालवीर्यमभव्यानामनाद्यपर्यवसितम्, भव्यानामनादिसपर्यवसितम्. पण्डितवीर्यन्तु सादिसपर्यवसितमिति। तीर्थंकराः प्रमादं कर्म-इति कथितवन्तः तथा-अप्रमादमकर्म, इत्युक्तवन्तः। अतः प्रमादेन बालवीर्यं भवति, भवतिचाऽप्रमादेन पण्डितवीर्यमिति निष्कर्षः ॥३॥

तत्र प्रमादवतः सकर्मणो जीवस्य यद्वीर्यं तद्बालवीर्यमिति तदेव दर्शयति सूत्रकारः-'सत्थमेगे तु' इत्यादि।

मूलम्-सत्थ मेगे तु सिक्खंता अतिवायाय पाणिणं।
एगे मंते अहिज्जंती पाणभूय विहेडिणो ॥४॥

कि प्रमत्त और सकर्मा जीव का बालवीर्य तथा अप्रमत्त और अकर्मा जीव का पण्डितवीर्य है। वीर्य के साथ 'बाल' या 'पण्डित' जो विशेषण लगाया गया है, वह प्रमाद और अप्रमाद के कारण ही है। अभव्य जीवों का बालवीर्य अनादि अनन्त है, भव्य जीवों का अनादिसान्त है अर्थात् वह सदाकाल से चला आता है किन्तु कभी उसका अन्त आजाता है। पण्डित वीर्य सादि-सान्त ही होता है।

निष्कर्ष यह है कि तीर्थंकर भगवन्तों ने प्रमाद को कर्म और अप्रमाद को अकर्म कहा है। अतएव प्रमाद के कारण बालवीर्य और अप्रमाद के कारण पण्डित वीर्य होता है ॥३॥

અને કર્મ વાળા જીવનું બાલવીર્ય અને અપ્રમત્ત અને અકર્મા-કર્મ વિનાના જીવનું 'પંડિત' વીર્ય છે વીર્યની સાથે 'બાલ' અથવા 'પંડિત' એ વિશેષણો લગાડવામા આવે છે. તે પ્રમાદ 'અને અપ્રમાદના કારણથી જ હોય છે.

અભવ્ય જીવોનું બાલવીર્ય અનાદિ અને અનંત છે. ભવ્ય જીવોનું અનાદિ સાન્ત છે. અર્થાત્ તે સદા કાળથી ચાલ્યું આવે છે, પરંતુ કોઈ સમય તેનો અન્ત આવી જાય છે, પંડિતવીર્ય સાદિ-સાન્ત જ હોય છે, આનો સાર એ છે કે-તીર્થંકર ભગવંતોએ પ્રમાદ ને કર્મ અને અપ્રમાદ ને અકર્મ કહેલ છે. તેજ પ્રમાદના કારણે બાલવીર્ય અને અપ્રાદના કારણે પંડિતવીર્ય હોય છે. ॥૩॥

छाया—शास्त्रमेके तु शिक्षन्ते अतिपाताय प्राणिनाम् ।
एके मन्त्रान् अधीयते प्राणभूतविहेटकान् ॥४॥

अन्वयार्थः—(एगे पाणिणं अतिवायाय) एके तु प्राणिनां जीवानाम् अतिपाताय विराधनाय 'सत्थं' शास्त्रं—धनुर्वेदादि 'सिक्खंता' शिक्षन्ते—गृह्णन्ति, 'एगे' एके (पाणभूयविहेडिणो) प्राणभूतविहेटकान् तत्र प्राणाः द्वीन्द्रियाः भूतानि पृथिव्यादीनि, तेषां वि—विविधम् अनेकप्रकारकं हेटकान्—बाधकान् 'मंते' मन्त्रान् 'अहिज्जंती' अधीयते—पठन्तीति ॥४॥

टीका—'एगे' एके पुरुषा', रागद्वेषाऽपहृतमानसाः, जीवानां विनाशकारकम् 'सत्थं' शस्त्रं—खड्गादिमहरणम्, अथवा—'सत्थं' शास्त्रम्—धनुर्वेदादिकम् 'सिक्खंता'

प्रमादवान् एवं सकर्मक जीव का वीर्य बालवीर्य है, यही सूत्रकार दिखलाते हैं—'सत्थमेगे उ' इत्यादि ।

शब्दार्थ—'एगे पाणिणं अतिवायाय—एके प्राणीनां अतिपाताय' कोई प्राणियों का वध करने के लिये 'सत्थं—शस्त्रम्' तलवार आदि शस्त्र अथवा धनुर्वेदादि 'सिक्खंता—शिक्षन्ते' सीखते हैं 'एगे—एके' तथा कोई 'पाणभूयविहेडिणो—प्राणभूतविहेठकान्' प्राणी और भूतों को मारनेवाले 'मंते—मन्त्रान्' मन्त्रों को 'अहिज्जंति—अधीयते' पढते हैं॥४॥

अन्वयार्थ—कोई कोई प्राणियों की विराधना करने के लिए धनुर्वेद आदि शास्त्र सीखते हैं । कोई प्राणों और भूतो के लिए बाधाकारी मंत्रों का अध्ययन करते हैं ॥४॥

टीकार्थ—राग और द्वेष के कारण जिनका चित्त अभिभूत हो गया है, ऐसे कई पुरुष जीवों का विनाश करने वाले 'सत्थ' अर्थात् खड्ग

પ્રમાદવાળા અને કર્મવાળા જીવને બાળવીર્ય છે. એજ હવે સૂત્રકાર પ્રગટ કરે છે. 'सत्थमेगे उ' ઇત્યાદિ

શબ્દાર્થ—'एगे पाणिणं अतिवायाय—एके प्राणिनां अतिपाताय' કોઈ પ્રાણિયોનો વધ કરવા માટે 'सत्थं—शस्त्रम्' તલવાર વિગેરે શસ્ત્ર અથવા ધનુર્વેદ વિગેરે 'सिक्खंता—खिक्षन्ते' શીખે છે. 'एगे—एके' તથા કોઈ 'पाणभूय विहेडिणो—प्राणभूतविहेटकान्' પ્રાણી અને ભૂતોને મારવાવાળા' 'मंते—मन्त्रान्' મંત્રોને 'अहिज्जंति—अधीयते' શીખે છે ॥૪॥

અન્વયાર્થ—કોઈ કોઈ વ્યક્તિ પ્રાણિયોની વિરાધના (હિંસા) કરવા માટે ધનુર્વેદ વિગેરે શસ્ત્રવિદ્યા શીખે છે, કોઈ વ્યક્તિ પ્રાણો અને ભૂતોને બાધા કારક મંત્રોનો અભ્યાસ કરે છે. ॥૪॥

ટીકાર્થ—રાગ અને દ્વેષના કારણે જેઓનું ચિત્ત પરાજીત થયેલ છે, એવા કોઇ પુરૂષો જીવોનો નાશ કરવાવ' 'ત્ર્ય' અર્થાત્ ખડ્ગ વિગેરે

शिक्षन्ते-सोद्यमास्तादृशं शस्त्रं शास्त्रं वा अभ्यसन्ति। अथवा-'एगे' एके एतादृशं शस्त्रं शास्त्रं वा शिक्षयन्ति, परानुपदिशन्ति। एतत्सर्वं शिक्षितं सत् 'पाणिणं' प्राणिनां-जीवानाम् 'अतिवायाय' अतिपाताय भवति, अतिपातो विनाशस्तदर्थं भवति। तदीयशास्त्रे केन प्रकारेण परो हिंसनीय इत्येव निवेदितम्।

तथोक्तम्—मुष्टिना छादयेल्लक्ष्यं मुष्टौ दृष्टिं निवेशयेत्।
हतं लक्ष्यं विजानीयादू यदि मूर्धा न कम्पते ॥१॥ इत्यादि।
एवं कथमरीणां मारणं, कथं परवञ्चनं, कामादिविषयः कथं सेव्यते?

आदि शास्त्रों की अथवा धनुर्वेद आदि शास्त्रों की शिक्षा लेते हैं और खूब उद्यम करके उन्हें सीखते हैं। अथवा इस प्रकार के शस्त्र या शास्त्र को वे दूसरों को सिखलाते हैं। यह सीखा हुआ या सिखलाया हुआ शस्त्र या शास्त्र प्राणियो की हिंसा का कारण बनता है, क्यों कि उन शास्त्रों में यही कहा जाता है कि किस प्रकार दूसरों का वध किया जाय! कहा भी है-'मुष्टिना छादयेल्लक्ष्यं' इत्यादि।

अपनी मुट्ठी से लक्ष्य को आच्छादित कर ले और मुट्ठीपर दृष्टि-जमाले। अगर मुर्धा पर कम्प न हो तो लक्ष्य को विंधा हुआ ही समझे ॥१॥ इत्यादि।

इस प्रकार उस शास्त्र में यही प्रख्यण किया है कि किस प्रकार शत्रुओं का घात किया जाय? कैसे दूसरों को धोखा दिया जाय?

શસ્ત્રોની અથવા ધનુર્વેદ વિગેરે શાસ્ત્રોની શિક્ષા ગ્રહણ કરે છે, અને ખૂબ ઉદ્યમ કરીને તે શીખે છે, અથવા તેવા પ્રકારના શસ્ત્ર અથવા શાસ્ત્રને તેઓ બીજાઓને શીખવાડે છે. આ પ્રકારથી શીખેલા કે શીખવાડેલા શસ્ત્ર અથવા શાસ્ત્ર પ્રાણિયોની હિંસાનું કારણ બને છે, કેમકે-એ શાસ્ત્રોમાં એજ કહેવામાં આવે છે કે-બીજાની હિંસા કઇ રીતે કરી શકાય? કહ્યું પણ છે કે-'મુષ્ટિના છાદયેલ્લક્ષ્યં' ઇત્યાદિ

અર્થાત્ પોતાની મુઠી વડે લક્ષ્યને આચ્છાદિત કરીલેય અને મુઠી પર નજર સ્થિર કરી લે. અથવા માથાં પર કમ્પ ન થાય તો લક્ષ્ય વિંધાયેલજ સમજવું. ॥૧॥

આ રીતે તે શાસ્ત્રમાં એ જ નિરૂપણ કરવામાં આવેલ છે કે-કેવી રીતે શત્રુઓનો ઘાત કરી શકાય? કેવી રીતે બીજાને દગો દઇ શકાય? અર્થાત્ ગફલતમાં નાખી શકાય? કામાદિ અશુભ અનુષ્ઠાન જ એ શાસ્ત્રનો

इत्यादि । तादृशशस्त्र शास्त्राऽभ्यासेन सावद्ये एव कर्मणि तदध्येतॄणां प्रवृत्तिर्भवति । तदेतत्पूर्वप्रदर्शितशस्त्रशास्त्राभ्यासेन जायमानं वीर्यं बालवीर्यमित्यभिधीयते । तथा-एके केचन पापोदयात् 'मंते' मन्त्रान् मारणकार्यै विनियुज्यमानान् अश्वमेध -नरमेध-गोमेध-श्येनादियागार्थम्, 'अहिज्जंती' अधीयते, तेषामध्ययनं कुर्वन्ति अध्यापयन्ति च । कथंभूतान् मन्त्रान् 'पाणभूयविहेडिणो' प्राणभूतविहेटकान् प्राणिनः-द्वीन्द्रियादयः, भूतानि पृथिव्यादीनि, तेषां विविधप्रकारेण हेटकान् मारकान् मन्त्रान् पठन्तीति ॥४॥

मूलम्-मायिणो कट्टु मायाय कामभोगे समारभे ।
हंता छेत्ता पगब्भित्ता आयसायाणुगामिणो ॥५॥

छाया—मायिनः कृत्वा मायाश्च कामभोगान् समारभन्ते ।
हन्तारश्छेत्तारः प्रकर्त्तयितार आत्मसातानुगामिनः ॥५॥

कामादि विषयक अशुभ अनुष्ठान ही उस शास्त्र का विषय है । जो ऐसे शस्त्र या शास्त्रका अभ्यास करते हैं, उनकी प्रवृत्ति सावद्य कर्मों में ही होती है इन शास्त्रों के अभ्यास से उत्पन्न होनेवाला वीर्य बालवीर्य कहलाता है । तथा कोई कोई लोग पापकर्म के उदयसे मन्त्रों को मारण कार्य में प्रयुक्त करते हैं और अश्वमेध, नरमेध, गोमेध, एवं श्येनयाग आदि में प्रयुक्त करने के लिये उन्हें पढते हैं और पढाते हैं वे मंत्र कैसे है ? सोकहते हैं-'प्राणभूयविहेडिणो' द्वीन्द्रियादिप्राणी, और पृथिवी आदि भूतों को मारने वाले हैं ऐसे मन्त्रों को पढते पढाते हैं ॥४॥

વિષય છે. જેઓ આવા પ્રકારની શસ્ત્ર વિદ્યા અથવા શાસ્ત્રનો અભ્યાસ કરે છે, તેઓની પ્રવૃત્તિ સાવદ્ય કર્મોમાં જ હોય છે. આવા પ્રકારના શાસ્ત્રોના અભ્યાસથી ઉત્પન્ન થવાવાળા વીર્યને બાલવીર્ય કહેવામાં આવે છે.

તથા કોઇ કોઇ લોકો પોતાના પાપ કર્મનો ઉદયથી મંત્રોને મારણ કાર્યમાં પ્રયુક્ત કરે છે, અને અશ્વમેધ, નરમેધ, ગોમેધ, અને શ્યેન યાગ વિગેરેમાં પ્રયુક્ત કરવા શીખે છે. અને શીખવાડે છે. એ મંત્રો કેવા છે ? તે બતાવતાં કહે છે-'पाणभूयविहेडिणो' બે ઇન્દ્રિય વગેરે પ્રાણી પૃથ્વી આદિ ભૂતોને મારવા વાળા હોય છે. તેવા મંત્રોને શીખેશીખવાડે છે. ॥૪॥

अन्वयार्थः—(मायिणो माया य कट्टु) मायिनः-परवञ्चकाः मायाश्च कृत्वा (कामभोगे समारभे) कामभोगान् शब्दादिविषयरूपान् समारभन्ते-कुर्वन्ति-सेवन्ते,-तथा-(आयसायाणुगामिणो) आत्मसातानुगामिनः-स्वसौख्यमिच्छन्तः (हंता) हन्तारः (छेत्ता) छेत्तारः (पगब्भित्ता) प्रकर्तयितारो भवन्तीति ॥५॥

टीका—'माइणो' मायिनः, माया परवंचनात्मिका सा विद्यते येषां ते मायिनः, 'माया' मयाः 'कट्टु' कृत्वा-परधनवनितादिकम् अपहृत्य 'कामभोगे'

'मायिणो कट्टु' इत्यादि ।

शब्दार्थ—'मायिणो माया य कट्टु-मायिनः मायाश्च कृत्वा' माया करनेवाले पुरुष माया अर्थात् छल कपट करके 'कामभोगे समारभे-कामभोगान् समारभन्ते' कामभोगों का सेवन करते हैं 'आयसाताणुगामिणो-आत्मसातानुगामिनः' तथा अपने सुखकी इच्छा करनेवाले वे 'हंता-हन्तारः' प्राणियों का हनन करनेवाले 'छेत्ता-छेत्तारः' छेदन करनेवाले 'पगब्भिता-प्रकर्तयितारः' और कर्तन करनेवाले होते हैं ॥५॥

अन्वयार्थ—मायावी लोग मायाचार करके शब्दादि विषयरूप कामभोगों का सेवन करते हैं। वे अपने सुख की इच्छा करते हुए जीवों का हनन करते हैं, छेदन करते हैं और विदारण-कर्त्तन करते हैं ॥५॥

टीकार्थ—माया का सेवन करनेवाले मायी (कपटी) या मायावी कहलाते हैं। ऐसे मायावी जन माया करके पराये धन स्त्री आदिका

'मायिणो कट्टु' ઇત્યાદિ

શબ્દાર્થ-'मायिणो माया य कट्टु-मायिनः माया कृत्वा' માયાચ્ચ કરવાવાળા પુરૂષ માયા અર્થાત્ છલ કપટ કરી ને 'कामभोगे समारभे-कामभोगान् समारभन्ते' કામભોગોનુ સેવન કરે છે. 'आयसाताणुगामिणो-आत्मशातानुगामिनः' તથા પોતાના સુખની ઇચ્છા કરવા વાળા એઓ 'हंता-हन्तारः' પ્રાણિયોનું હનન કરવા વાળા 'छेत्ता-छेत्तारः' છેદન કરવાવાળા 'पगब्भिता-प्रकर्त्तयितारः' અને કર્તન કરવા વાળા હોય છે. ॥૫॥

અન્વયાર્થ—માયાવી લોકો માયાચાર કરીને શબ્દાદિ વિષય રૂપ કામભોગોનું સેવન કરે છે તેઓ પોતાના સુખની ઇચ્છા કરીને અન્ય જીવોની હિંસા કરે છે, છેદન કરે છે, અને વિદારણ-કર્ત્તન કરે છે. ॥૧॥

ટીકાર્થ—માયાનું સેવન કરવાવાળા માયી (કપટી) અથવા માયાવી કહેવાય છે. એવા માયાવી માણસો માયા કરીને પારકા ધન સ્ત્રી વિગેરેનું

कामभोगांश्च 'समारभे' समारभन्ते-सेवन्ते, परवञ्चनयाऽन्यदीयधनादिभिः कामभोगादीनां सेवनं कुर्वन्ति : तथा-'आयसायाणुगामिणो' आत्मशातानुगामिनः-आत्मनः कृते सातं सुखं तदनुगामिनः, कषायकलुषितान्तरात्मानः, आत्मनः सुखं लक्षीकृत्य अन्येषां प्राणिनाम् । 'हंता' हन्तारः-विराधयितारः, 'छेत्ता' छेत्तारः-छेदनकर्त्तारो भवन्ति । कर्णनासिकादीनाम् 'पगब्भित्ता' प्रकर्त्तयितारः पृष्ठोदरादीनाम् । आत्मसुखार्थं हननादिव्यापारं कुर्वन्ति, इति ॥५॥

हननच्छेदनादिकं केन प्रकारेण कुर्वन्ति, तदेव सूत्रकारो दर्शयति-'मणसा वचसा चेव' इत्यादि ।

मूलम्-मणसा वचसा चेव कायसा चेव अंतसो ।

आरओ परओ वावि दुहा वि य असंजया ॥६॥

छाया--मनसा वचसा चैव कायेन चैव अन्तशः ।

आरतः परतो वापि द्विधाऽपि चाऽसंयताः ॥६॥

अपहरण करते हैं और कामभोगों का सेवन करते हैं, अर्थात् दूसरे के धन आदि ले कामभोगों को भोगते हैं । तथा अपने ही सुख के लिए प्रयत्न करनेवाले वे कषाय से कलुषित चित्त होकर अन्य प्राणियों की विराधना करते हैं, उनके कान नाक आदि का छेदन करते हैं, पीठ पेट आदि को चीरते या काटते हैं । अपने ही सुख के लिए वे यह सब पाप क्रियाएँ करते है ॥५॥

वे इस प्रकार हनन एवं छेदन आदि करते हैं, सूत्रकार यह दिखलाते हैं-'मणसा वचसा चेव' इत्यादि ।

शब्दार्थ—असंजया-असंयताः, असंयमी पुरुष 'मणसा-वचसा चेव कायसा-मनसा वचसा चैव कायेन' मन, वचन और कायसे

હરણ કરે છે, અને કામભોગોનું સેવન કરે છે, અર્થાત્ બીજાઓના ધન વિગેરેથી કામભોગો ભોગવે છે, અને પોતાના જ સુખ માટે પ્રયત્ન કરનારા તેઓ કષાયથી મલિન ચિત્ત વાળા થઈને બીજા પ્રાણિયોની વિરાધના-હિંસા કરે છે, કાન-નાક વિગેરેનું છેદન કરે છે, પીઠ (વાંસો) પેટ વિગેરે ચીરે છે, તેઓ પોતાના જ સુખ માટે આવા પ્રકારની પાપક્રિયાઓ કરતા રહે છે. ॥૫॥

તેઓ હનન અને છેદન કઈ રીતે કરે છે ? વિગેરે બતાવતાં સૂત્રકાર 'मणसा वचसा चेव' ગાથા કહે છે.-

શબ્દાર્થ--'असंजया-असंयतः' અસંયમી પુરૂષ 'मणसा वचसा चेव कायसा-मनसा वचसा च कायेन' મન, વચન અને કાયથી 'अंतसो-अन्तशः'

अन्वयार्थः—(असंजया) असंयताः—असंयमिनः (मणसा वचसा चेव कायसा) मनसा वचसा चैव कायेन—कृतकारितानुमतिभिः (अंतसो) अन्तशः—कायेनाशक्तावपि मनसैव पापानुष्ठानानुमत्या (आरओ परओ वावि) आरतः परतो वापि—इहलोकपरलोकार्थम् (दुहा वि) द्विधापि स्वयं करणेन परकारणेन च जीवविराधका भवन्तीति ॥६॥

टीका—'असंजया' असंयता मनोवाक्कायैः पुरुषाः परवञ्चकाः। 'मणसा' मनसः 'वयसा' वचसा 'चेव' च एव, तथा-'कायसा' कायेन—शरीरेण, अनेन शरीरवाङ्मनसां प्रवर्त्तने कारणत्वं दर्शितम्। 'अंतसो' अन्तशः—शरीरादिभिरसमर्था अपि चिन्तनमात्रेणैव परघातमिच्छन्ति कालशौकरिकवत् 'आरओ'

'अंतसो—अन्तशः' कायाकी शक्ति न होने पर मनसे ही 'आरओ परओ वावि—आरतः परतः वापि' इसलोक एवं परलोक दोनों के लिये 'दुहा वि—द्विधापि' करने और कराने दोनों प्रकार से जीवों का घात कराते हैं।६॥

अन्वयार्थ—असंयमी पुरुष मन से, वचन से और काय से, तथा कृत, कारित और अनुमोदन से एवं काय से असमर्थ होने पर मन से ही पाप के अनुष्ठान की अनुमोदना करके, इस लोक और परलोक दोनों के लिए स्वयं करने और कराने से—दोनों प्रकार से जीवों के विराधक होते हैं ॥६॥

टीकार्थ—जो पुरुष मन, वचन और काय से असंयमी हैं—परवंचक (दूसरे को ठगने वाले) हैं; वे मन, वचन, काय से और शरीर से असमर्थ होने पर चिन्तन मात्र से दूसरों के घात की इच्छा करते हैं।

અંતસો અર્થાત્ કાયની શક્તી ન હોવાંછતાં મનથી જ 'आरओ परओवा वि-आरतः परतः वापि' આલેક અને પરલેક એ બન્ને લેાક માટે 'दुहावि-द्विधापि' કરવું અને કરાવવુ એ બન્ને પ્રકારથી જીવેાનેા ઘાત કરાવે છે. ॥૬॥

અન્વયાર્થ—અસંયમી પુરૂષેા મનથી, વચનથી અને કાયાથી તથા કૃત, કારિત અને અનુમેદનથી તથા કાયથી અસમર્થ—અશક્ત થાય ત્યારે મનથીજ પાપના અનુષ્ઠાનની અનુમેદના કરીને આલેાક અને પરલેાક બન્ને માટે પેાતે કરવા અને કરાવવાથી અર્થાત્ બેઉ પ્રકારથી જીવેાની વિરાધના કરે છે. ॥૬॥

ટીકાર્થ—જે પુરૂષ મન, વચન, અને કાયાથી અસંયમી હેાય છે. પરવંચક—બીજાને ઠગવાવાળા હેાય છે, તેઓ મન વચન અને કાયાથી અને શરીરથી અશક્ત થાય ત્યારે વિચાર માત્રથી બીજાઓના ઘાતની ઇચ્છા કરે છે.

आरतः—इहलोके सुखार्थम् 'परओ' परतः—परलोकाय परलोकसुखाय वा 'दुहा वि' द्विधापि—स्वयं करणेन, परकारणेन च। स्वयमाचरन्ति परद्वारा कारयन्ति च। रागद्वेषान्धःपुरुषो मनोवाक्कायैः, तथा शरीरशक्त्यभावे वचनेन, केवलमनसा वा, ऐहिकपारलौकिकयो र्द्वयोरेव कृते प्राणिघातं स्वयं करोति परांश्च कारयतीति भावः ॥६॥

हिंसाजनितपापस्य फलं दर्शयति—'वेराइ कुव्वई वेरी' इत्यादि।

मूलम्—वेराइं कुव्वई वेरी, तओ वेरेहिं रज्जई।
पावोवगा य आरंभा दुक्खफासा य अंतसो ॥७॥

छाया—वैराणि करोति वैरी ततो वैरैः रज्यते।
पापोपगाश्च आरम्भा दुःखस्पर्शाश्च अन्तशः ॥७॥

इस विषय में कालशौकरिक का उदाहरण प्रसिद्ध है। वे इस लोक के सुख के लिए और परलोक के सुख के लिए दोनों प्रकार से अर्थात् स्वयं घात करके और दूसरों से घात करवा कर प्राणियों की हिंसा करते हैं।

आशय यह है कि राग और द्वेष से अन्धा पुरुष मन, वचन, काय से और शारीरिक शक्ति न हो तो सिर्फ वचन से या केवल मन से, इस लोक और परलोक के लिए स्वयं जीववध करता है और दूसरों से भी करवाता है ॥६॥

अब हिंसा जनित पाप का फल दिखलाते हैं—

'वेराइं कुव्वई वेरी' इत्यादि।

शब्दार्थ—'वेरी वेराइं कुव्वइ—वैरी वैराणि करोति' जीवघात करने

આ સંબંધમાં કાલશૌકરિકનું ઉદાહરણ પ્રસિદ્ધ છે. તેઓ આ લોકના સુખ માટે અને પરલોકના સુખ માટે બંને પ્રકારથી અર્થાત્ સ્વયં ઘાત કરીને તથા બીજાઓથી ઘાત કરાવીને પ્રાણિયોની હિંસા કરે કરાવે છે.

કહેવાનો હેતુ એ છે કે—રાગ અને દ્વેષથી આંધળા બનેલ પુરૂષો મન, વચન અને કાયા (શરીર) થી અને શારીરિક શક્તિ ન હોય તો કેવળ વચન માત્રથી અથવા કેવળ મનથી આ લોક અને પરલોક માટે સ્વયં જીવોની હિંસા કરે છે, અને બીજાઓ પાસે પણ હિંસા કરાવે છે. ॥ ૬ ॥

હવે હિંસાથી થનારા પાપનું ફળ બતાવે છે.—'वेराइं कुव्वई वेरी' ઇત્યાદિ

શબ્દાર્થ—'वेरी वेराइं कुव्वई—वैरी वैराणि करोति' જીવનો ઘાત કરવાવાળો

अन्वयार्थः—(वेरी वेराइं कुव्वई) वैरी-जीवोपमर्दनकारी-वैराणि-जन्मशतानुबन्धीनि करोति (तओ वेरेहिं रज्जई) ततः वैरैः=नवीनवैरैः रज्यते सम्बध्यते (आरंभा य पावोवगा) आरंभाः सावद्यानुष्ठानरूपाः पापोपगाः-पापम् उपसामीप्येन गच्छन्तीति, 'अंतसो दुक्खफासा' अन्तशः दुःखस्पर्शाः नवीनं दुःख मुत्पादयन्तीति ॥७।

टीका—'वेरी' वैरी-षड्जीवनिकायोपमर्दकारी पुरुषः 'वेराइं' वेराणि यं हिनस्ति तेन सह वैरभावम् 'कुव्वई' करोति, यं प्राणिविशेष मेकदा हिनस्ति तेन सह जन्मशतानुबन्धीनि वैराणि बध्नाति। 'तओ' ततः-पुनरपि 'वेरेहिं' वैरैः

वाला पुरुष, अनेक जन्म के लिये जीवों के साथ वैर करता है 'तओ वेरेहिं रज्जइ-ततः वैरैः रज्यते' फिर वह दूसरा नया वैर करता है 'आरंभा पावोवगा-आरंभाः पापोपगाः' जीवहिंसा पाप उत्पन्न करती है 'अंतसो दुक्खफासा-अन्तशः दुक्खस्पर्शाः' और अन्त में दुःख देती है ॥७॥

अन्वयार्थ--वैरी अर्थात् जीवों की हिंसा करने वाला सैकड़ों जन्मों तक चालू रहने वाला वैर बाँधता है। फिर नया वैर उत्पन्न करता है। आरंभ पापरूप होते हैं और अन्त में दुःख को उत्पन्न करते हैं ॥७॥

टीकार्थ—षट् जीवनिकायों का उपमर्दनकारी अर्थात् छकायों की विराधना करने वाला पुरुष, जिसकी हिंसा करता है, उसके साथ वैरभाव उत्पन्न करता है। अर्थात् जिस प्राणी का एक बार घात करता है, उसके साथ सैकड़ों जन्मों तक चालू रहने वाला विरोध-वैर बाँधता

પુરૂષ અનેક જન્મ માટે જીવોની સાથે વેર કરે છે. 'तओ वेरेहिं रज्जइ-ततः वैरैः रज्यते' તે પછી તે બીજું નવું વેર કરે છે 'आरंभा पावोवगा-आरंभाः पापोपगाः' જીવ હિંસા પાપ ઉત્પન્નકરે છે. 'अंतसो दुःखफासा-अन्तशः दुक्खस्पर्शाः' અને છેવટે દુ.ખ દે છે. ॥૭॥

અન્વયાર્થ—વેરી અર્થાત્ જીવોની હિંસા કરવાવાળાઓ સેંકડો જન્મ સુધી ચાલૂ રહેનારૂં વેર બાંધે છે. અને નવું વેર ઉત્પન્ન કરે છે. આરંભ પાપરૂપ હોય છે, અને અન્તે દુ ખ પ્રાપ્ત કરે છે. ॥૬॥

ટીકાર્થ—ષડ્જીવનિકાયોનું ઉપમર્દન (હિંસા) કરવાવાળા અર્થાત્ છ કાયોની વિરાધના કરવાવાળા પુરૂષો, જેની હિંસા કરે છે, તેની સાથે વેરભાવ ઉત્પન્ન કરે છે. અર્થાત્ જે પ્રાણીનો એકવાર ઘાત કરે છે, તેની સાથે સેંકડો

'रज्जई' रज्यते, वैरपरम्परया सम्बद्धयते। एकस्मिन् येन कृतं वैरं जन्मान्तरे तमपकरोति, ततः पुनरपि तेन सह वैरं करोति, इति वैरपरम्परा सर्वदैवाऽनुदिनं वर्द्धत एव। कथं वैरपरम्परायाः समुद्भव इत्यत्र आह-'पावोवगा' 'पापोपगाः, पापमुपसामीप्येन गच्छन्तीति पापोपगाः। के पापोपगाः-तत्राह-आरम्भाः, आरभ्यन्ते-संपाद्यन्ते इति आरम्भाः सावद्यकर्माऽनुष्ठानस्वरूपाः, एतादृशा आरम्भाः 'अंतसो' अन्तशः-स्वविपाकोदयसमये 'दुक्खफासा' दुःख-स्पर्शाः, दुःखं स्पृशन्तीति-दुःखस्पर्शाः-दुःखजनका भवन्ति। जीवहिंसाकर्त्ताऽनेक जन्मनि तेन सह वैरं करोति। इदानीं य एनं मारयति स जन्मान्तरे तं हिनस्ति,

है और फिर वैर की परम्परा से सम्बद्ध होता है-नया नया वैर बाँधता जाता है। जिसके साथ वैर बाँधा है, वह एक जन्म में उसका बदला लेता है। उस समय फिर नवीन वैर बँध जाता है। इस प्रकार वैर का प्रवाह जन्म जन्मान्तर तक चलता ही रहता है और बढता ही जाता है।

इस वैर परम्परा के उद्भव का कारण दिखलाते हुए सूत्रकार करते हैं-पापों को उत्पन्न करने वाले आरंभ अपने विपाकोदय के समय दुःख के जनक होते हैं।

अभिप्राय यह है कि जीवों की हिंसा करने वाला उन जीवों के साथ वैर बांधता है। इस समय जो जिस जीव को मारता है, वह जन्मान्तर में मारने वाले को मारता है।

आज का वध्य कल वधक बन जाता है और वधक वध्य बन जाता है। अर्थात् मारने वाला जिस जीव को मारता है दूसरे जन्म में वह

જન્મ સુધી ચાલૂ રહેનારો વિરોધ-વેર ભાવ બાંધે છે, અને પછી તે વેરની પરંપરાથી બંધાયેલો રહે છે, અને નવું નવું વેર બાંધતા જાય છે જેની સાથે વેર બાંધ્યું છે, તે એક જન્મમાં તેનો બદલો લેય છે, ત્યારે પાછું નવું વેર બંધાય છે, આ રીતે વેરનો પ્રવાહ (વેણ) જન્મ જન્માન્તર સુધી ચલતો જ રહે છે. અને વધતો જ રહે છે.

આ વેરની પરંપરા ઉત્પન્ન થવાનું કારણ બતાવતાં સૂત્રકાર કહે છે કે-પાપોને ઉત્પન્ન કરવાવાળો આરંભ પોતાના વિપાકના ઉદય વખતે દુઃખ કારક હોય છે.

કહેવાનો અભિપ્રાય એ છે કે-જીવોની હિંસા કરવાવાળાઓ તે જીવોની સાથે વેર બાંધે છે. આ જન્મમાં જે જેને મારે છે, તે જન્માન્તરમાં અર્થાત્ બીજા જન્મમાં મારવા વાળાને મારે છે. આ જ વધ્ય (મરનર) કાલે વધક (મારવાવાળો) બની જાય છે. અર્થાત્ મારવાવાળો જે જીવને મારે છે, બીજા

हतो हन्तारं हिनस्तीति संबद्धा वैरपरम्परा। यतो हि-हिंसा पापमुत्पादयति, पापफलं दुःखमिति हेया हिंसा हितामिलाषिभिरिति ॥७।

मूलम्-संपरायं णियच्छंति अत्तदुक्कडकारिणो।
रागदोसस्सिया बाला पावं कुव्वंति ते बहुं ॥८॥

छाया—सांपरायकं नियच्छन्ति आत्मदुष्कृतकारिणः।
रागद्वेषाश्रिता बालाः पापं कुर्वन्ति ते बहु ॥८॥

अन्वयार्थः—(अत्तदुक्कडकारिणो) आत्मदुष्कृतकारिणः-स्वपापविधायिनः जन्तः (सपरायं णियच्छंति) साम्परायिकं कर्म नियच्छन्ति-बध्नन्ति (रागदोस-

---

जीव मारने वाले को मारता है। इस प्रकार जो परम्परा चल पड़ती है, उसका सैकड़ों भवों तक अन्त नहीं आता। हिंसा पाप को जन्म देती है और पाप दुःख का जनक होता है। अतएव जो अपना हित चाहते हैं, उन्हें हिंसा का सर्वथा त्याग करदेना चाहिए ॥७॥

'संपरायं' इत्यादि।

शब्दार्थ—अत्तदुक्कडकारिणो-आत्मदुष्कृतकारिणः' स्वयं पाप करने वाले जीव 'संपरायं नियच्छंति-सांपरायिकम् नियच्छन्ति' सांपरायिक कर्म बांधते हैं 'रागदोसस्सिया ते बाला-रागद्वेषाश्रिताः ते बालाः' राग और द्वेष के आश्रयसे वे अज्ञानी 'बहु पावं कुव्वंति-बहु पापं कुर्वन्ति' बहुत पापकर्म करते हैं ॥८॥

अन्वयार्थ—स्वयं पाप करने वाले जीव साम्परायिक (संसार परि-

જન્મમાં તે જીવ મારનારને મારે છે. આ રીતની જે પરંપરા ચાલુ થાય છે તેનો અંત સેંકડો ભવો સુધી આવતો નથી. હિંસા પાપને ઉત્પન્ન કરે છે, અને પાપ દુઃખકારક હોય છે. તેથી જેઓ પોતાનું હિત ઇચ્છે છે તેણે હિંસાનો હંમેશાં ત્યાગ કરવો જોઇએ. ॥૭॥

'संपरायं' ઇત્યાદિ

શબ્દાર્થ—'अत्तदुक्कडकारिणो-आत्मदुष्कृतकारिणः' પોતે જ પાપ કરવાવાળા જીવ 'संपरायं नियच्छंते-सांपरायिकम् नियच्छन्ति' सांपरायिक કર્મ બાંધે છે 'रागदोसस्सिया ते बाल'-रागद्वेषाश्रिताः ते बालाः' રાગ અને દ્વેષના આશ્રયથી તે અજ્ઞાનિયો 'बहु पावं कुव्वंति-बहु पापं कुर्वन्ति' ઘણું જ પાપ કર્મો કરે છે ॥૮॥

અન્વયાર્થ—સ્વયં પાપ કરવા વાળો જીવ સાંપરાયિક (સંસારના

स्सिया) रागद्वेषाश्रिताः-कषायकलुषितान्तरात्मानः (ते बाला) ते बालाः-सदसद्विवेकविकला अज्ञानिनः (बहुपावं कुव्वंति) बहु-अनन्तं पापम् असद्वेधं कुर्वन्ति-विदधतीति ॥८॥

टीका—'अत्तदुक्कडकारिणो' आत्मदुष्कृतकारिणः, आत्मना स्वयमेव दुष्कृतकर्मकर्त्तारः सावद्यकर्मानुष्ठानमाचरन्तः 'संपरायं णियच्छंति' सांपरायिकं नियच्छन्ति। द्विविधं हि कर्म भवति-ईर्यापथम् सांपरायिकं च। तत्र-संपरायाः-बादरकषायाः, तेभ्य आगतं यत् सांपरायिकम्, तादृशं कर्म जीवोपमर्दनात् आत्मदुष्कृतकारिणोऽभद्राः पुरुषाः नियच्छन्ति-बध्नन्ति। कथंभूतास्ते ये तादृशं साम्परायिकं कर्म अनुबध्नन्ति, तत्राह-'रागदोससिस्सिया' रागद्वेषाश्रिताः कषायकलुषितान्तरात्मानः रागद्वेषाभ्यां युक्ताः सन्तो जीवान् हिंसन्ति नरकादिदुर्गतिहेतुकर्म अनुबध्नन्ति च। तथाविधं कर्म रागद्वेषात्मककषायकलुषिताऽन्तःकरणा, अत एव बालाः सदसद्विवेकविकलाः, 'पावं' पापम् अष्टादशभेदरूपं विविधासद्वेदनीयजनकम्। 'बहु' अनेकविधम् 'ते कुव्वंति' ते कुर्वन्ति। स्वेनैव

भ्रमण के) कर्म का बन्ध करते हैं। वे अज्ञानी रागद्वेष से मलीन होकर बहुत पाप उपार्जन करते हैं ॥८॥

टीकार्थ—जो स्वयं पापकर्म का आचरण करते हैं, वे साम्परायिक कर्म को बांधते हैं। कर्मबन्ध दो प्रकार का है ईर्यापथ और साम्परायिक। जो कर्मबन्धन बादर कषाय से होता है, वह साम्परायिक कहलाता है। जीवहिंसा से साम्परायिक कर्म का बन्ध होता है।

जो जीव रागद्वेष के आश्रित हैं अर्थात् जिनकी अन्तरात्मा कषायों से कलुषित हैं और इस कारण जो हिंसा करते हैं, वे नरक आदि दुर्गतियों के कारणभूत कर्म का बन्ध करते हैं। ऐसे कर्म अनेक

પરિભ્રમણ) કર્મનો બંધ કરે છે, તેઓ અજ્ઞાની અને રાગદ્વેષથી મલીન થઇને ઘણું જ પાપનું ઉપાર્જન કરે છે. ॥૮॥

ટીકાર્થ—જેઓ સ્વયં પાપકર્મનું આચરણ કરે છે, તેઓ સાંપરાયિક કર્મને બાંધે છે. કર્મબંધ બે પ્રકારના છે, ઇર્યાપથ અને સાંપરાયિક જે કર્મનો બંધ બાદર કષાયથી થાય છે, તે સાંપરાયિક કહેવાય છે. જીવહિંસાથી સાંપરાયિક કર્મનો બંધ થાય છે.

જે જીવ રાગ દ્વેષથી યુક્ત હોય છે અર્થાત્ જેઓનો આત્મા કષાયોથી મલીન થયેલો છે, અને તે કારણથી જેઓ હિંસા કરે છે, તેઓ નરક વિગેરે દુર્ગતિઓના કારણભૂત કર્મનો બંધ કરે છે. એવા કર્મો અનેક

पापकर्माऽनुष्ठातारः चतुर्गतिभ्रमणहेतुकं साम्परायिकं कर्म बध्नन्ति, तथा-राग द्वेषकषायकलुषितान्तःकरणाः कुर्वन्ति-अनेकविधं कर्म इतिभावः ॥८॥

तदेव बालवीर्यमुपदर्श्य तदुपसंहरन्नाह-'एयं' इत्यादि ।

मूलम्-एयं सकम्मवीरियं बालाणं तु पवेइयं ।
इत्तो अकम्मवीरियं पंडियाणं सुणेह मे ॥९॥

छाया—एतत्सकर्मवीर्यं बालानां तु प्रवेदितम् ।
अतोऽकर्मवीर्यं पण्डितानां शृणुत मे ॥९॥

प्रकार के असाता रूप दुःख को उत्पन्न करने वाले होते हैं। सत् के विवेक से रहित अज्ञानी जीव ही ऐसे कर्म उपार्जन करते हैं।

तात्पर्य यह है कि स्वयं पाप कर्म का अनुष्ठान करने वाले अज्ञानी जीव चतुर्गति में भ्रमण करने के कारण साम्परायिक कर्म का बन्ध करते हैं तथा जो राग द्वेष से कलुषित हैं, वे अनेक प्रकार के कर्म उपार्जन करते हैं ॥८॥

इस प्रकार बालवीर्य को दिखला कर उपसंहार करते हैं-'एयं सकम्मवीरियं' इत्यादि ।

शब्दार्थ—'एयं-एतत्' यह 'बालाणं तु-बालानां तु' अज्ञानियों का 'सकम्मवीरियं पवेइयं-सकर्मवीर्यं प्रवेदितम्' स्वकर्मवीर्य कहागया है 'इत्तो-अतः' अब यहां से 'पंडियाणं-पंडितानाम्' उत्तम साधुओं का 'अकम्मवीरियं-अकर्मवीर्यम्' अकर्मवीर्य 'मे-मे' मेरेसे 'सुणेह-शृणुत' हे शिष्यो सुनो ॥९॥

પ્રકારની અશાતા (અશાંતિ) રૂપ દુ.ખને ઉત્પન્ન કરવાવાળા હોય છે. સત્ અસત્ના વિવેક વિનાના અજ્ઞાની જીવોજ એવા કર્મોનું ઉપાર્જન કરે છે.

કહેવાનું તાત્પર્ય એ છે કે-પોતે-પાપકર્મનું અનુષ્ઠાન કરવાવાળા અજ્ઞાની જીવો ચતુર્ગતિમાં ભ્રમણ કરવાને કારણે સાંપરાયિક કર્મનો બંધ કરે છે તથા જેઓ રાગદ્વેષથી મલીન થયેલા છે; તેઓ અનેક પ્રકારના કર્મોનું ઉપાર્જન (પ્રાપ્તિ) કરે છે. ॥૮॥

આ રીતે બાલવીર્યને બતાવીને ઉપસંહાર કરતાં કહે છે કે-'एयं सकम्मवीरियं' ઈત્યાદિ

શબ્દાર્થ—'एयं-एतत्' આ 'बालाणं तु-बालानां तु' અજ્ઞાનિયો નું 'सकम्मवीरियं पवेइयं-सकर्मवीर्यम् प्रवेदितम्' સ્વકર્મ વીર્ય કહેલ છે. 'इत्तो-अतः' હવે અહિંથી 'पंडियाणं-पंडितानाम्' ઉત્તમ સાધુઓનુ 'अकम्मवीरियं-अकर्मवीर्यम्' અકર્મ વીર્ય 'मे-मे' મારી પાસેથી 'सुणेह-शृणुत' હે શિષ્યો ! તમે સાંભળો ॥૯॥

अन्वयार्थः—(एयं) एतत्-पूर्वोपदर्शितम् (बालाणं तु) बालानां तु (सकम्मवीरियं पवेइयं) सकर्मवीर्यं प्रवेदितं-कथितम् (इतो) अतःपरम् (पंडियाणं) पण्डितानाम् (अकम्मवीरियं) अकर्मवीर्यम् (मे) मे-मत्तः (सुणेह) शृणुत हे शिष्याः ! इति ॥९॥

टीका—'एयं' एतत्पूर्वं यत्प्रतिपादितम्। तथाहि-जीवोपमर्दनाय केचन शस्त्रं शास्त्रं च शिक्षन्ते। तथाऽपरे प्राणिविराधनाभिचारिकान्मन्त्रानधीयते। ततोऽपरे पुनर्मायाविनोऽनेकमकारिकां मायामुद्भाव्य कामभोगार्थमर्थिनः समारम्भानारभन्ते। अन्ये पुनरेरिणं लक्षीकृत्य तथाविधं कर्माऽनुतिष्ठन्ति, यावती वंशपरम्परा वैरं मनुबध्नते। एवं हि कषायवशवर्त्तिनो नराः तथा कुर्वन्ति यथा वंशपरम्परा बद्धवैरा जायते। एतत्सर्वम् 'बालाणं' बालानां सदसद्विवेकविकलानाम्। 'सकम्मवीरियं' सकर्मवीर्यम् 'पवेइयं' प्रवेदितम्-कथितम्।

अन्वयार्थ—हे शिष्यो ! यह पूर्वोक्त अज्ञानी जीवों का सकर्म वीर्य कहा गया, इसके अनन्तर पण्डितों ज्ञानी जनों का अकर्मवीर्य मुझसे सुनो ॥९॥

टीकार्थ—इससे पूर्व कहा जा चुका है कि कोई कोई बाल जीव जीवों की हिंसा के लिए शस्त्र एवं शास्त्र का अभ्यास करते हैं। कोई प्राणियों की विराधना करने वाले मंत्रों का अध्ययन करते हैं। कोई कोई कामभोग के अभिलाषी मायावी मायाचार करके आरंभ समारंभ करते हैं। कोई अपने शत्रु को लक्ष्य करके ऐसे कृत्य करते हैं जिनसे वंशपरम्परागत वैर बँध जाता है।

यह सब सत् असत् के विवेक से रहित बालजीवों का सकर्मवीर्य

અન્વયાર્થ— હે શિષ્યો ! આ પહેલાં કહેલ પ્રકારથી અજ્ઞાની જીવોનું સકર્મ વીર્ય કહેવામાં આવેલ છે. હવે પંડિતો—જ્ઞાનીજનોનું અકર્મવીર્ય કહું છું તે તમો સર્વે મારી પાસેથી સાંભળો. ॥૯॥

ટીકાર્થ—આનાથી પહેલાં કહેવામાં આવેલ છે કે—કોઇ કોઇ બાલ—અજ્ઞાની જીવ જીવોની હિંસા કરવા માટે શસ્ત્ર અને શાસ્ત્રોનો અભ્યાસ કરે છે. કોઈ કોઈ પ્રાણિયોની વિરાધના કરવાવાળા મંત્રોનું અધ્યયન કરે છે. કોઈ કોઇ કામભોગોની ઇચ્છા વાળા માયાવી માયાચાર કરીને આરંભ સમારંભ કરે છે. કોઇ પોતાના શત્રુને ઉદ્દેશીને એવા પાપ કૃત્યો કરે છે. જેથી વંશ પરંપરાગત વેર બંધાઇ જાય છે.

આ બધું સત્ અસત્ના વિવેક રહિત બાલજીવોનું સકર્મવીર્ય કહેલ છે.

(बालाणं तु) इत्यत्र तु शब्देन प्रमादवतां वीर्यमपि संगृहीतम् । 'इत्तो' अतःपरम् 'पंडियाणं' पण्डितानाम् 'अकम्मवीरियं' अकर्मवीर्यम् 'मे' मम कथयतः 'सुणेह' शृणुत यूयमिति शेषः । एतावता प्रबन्धेन बालानां जीवानां सकर्मवीर्यं प्रदर्शितम्, अतःपरं पण्डितानामकर्मवीर्यं कथयामि, तद्भवन्तः शृण्वन्तु इति ।९।

उक्तं बालवीर्यं साम्प्रतं पण्डितवीर्यमाह–'दविए' इत्यादि।

मूलम्–दविए बंधणुम्मुक्के सव्वओ छिन्नबंधणे।
पणोल्ल पावकं कम्मं सल्लं कंतति अंतसो ॥१०॥

छाया—द्रव्यो बन्धनोन्मुक्तः सर्वतश्छिन्नबन्धनः ।
प्रणुद्य पापकं कर्म शल्य कृन्तत्यनेकशः ॥१०॥

कहा गया है। मूल में आये हुए 'बालाणं तु' में 'तु' शब्द से प्रमादवान् जीवों के वीर्य का भी संग्रह किया गया है।

बालवीर्य के प्ररूपण के पश्चात् मैं पण्डितों का अकर्मवीर्य कहूँगा, उसे तुम सब सुनो ।९॥

अब पण्डितवीर्य का कथन करते हैं–'दविए' इत्यादि।

